मॉडल प्रश्न –पत्र का प्रारूप

कक्षा – दशमी **विषय– संस्कृतम् (तृतीय भाषा)** **अवधि– 3.15 घंटे** **पूर्णांक – 80**

1. उद्देश्य हेतु अंकभार –

क्र.सं.	उद्देश्य	अंकभार	प्रतिशत
1.	ज्ञान	15	18.75
2.	अवबोध / अर्थग्रहण	28	35.00
3.	ज्ञानोपयोग / अभिव्यक्ति	25	31.25
4.	कौशल / मौलिकता	12	15
	योग	80	100

2. प्रश्नों के प्रकार एवं अंकभार –

क्र.सं.	प्रश्नों के प्रकार	प्रश्नों की संख्या	अंक प्रति प्रश्न	कुल अंक	प्रतिशत	सम्भावित समय मिनट
1.	वस्तुनिष्ठ / बहुविकल्पात्मक	–	–	–	–	–
2.	अतिलघूत्तरात्मक	7	1	07	08.75	21 मिनट
3.	लघूत्तरात्मक I	5	2	10	12.50	20 मिनट
4.	लघूत्तरात्मक II	9	9X3	27	33.75	45 मिनट
5.	निबंधात्मक	7	4X4, 5X2, 10X1	36	45.00	84 मिनट
	योग	28	–	80	100	170 मिनट

विकल्प योजना : आन्तरिक **पुनरावलोकन – 10 मिनट**

3. विषय वस्तु का अंकभार – **प्रश्नपत्र अवनोकन समय – 15 मिनट**

क्र.सं.	इकाई	अंकभार	प्रतिशत
1.	पठितगद्यांशस्य हिन्दीभाषया अनुवादः	5	6.25
2.	पठितपद्यांशस्य हिन्दीभाषया अनुवादः	5	6.25
3.	पठितपद्यांशस्य संस्कृत–व्याख्या	4	5.00
4.	पठितनाट्यांशस्य संस्कृत–व्याख्या	3	3.75
5.	प्रश्नोत्तराणि संस्कृतमाध्यमेन अष्टसु–षट् प्रश्नानाम्	3	3.75
6.	प्रश्ननिर्माणम्	4	5.00
7.	पाठ्यपुस्तकात् श्लोकद्वयलेखनम्	3	3.75
8.	अपठितावबोधनम् (एकः सरलः गद्यांशः)	10	12.50
9.	सन्धिः	4	5.00
10.	समासः	3	3.75
11.	कारकाणि	3	3.75
12.	प्रत्ययाः	4	5.00
13.	अव्ययपदानि	3	3.75
14.	वाच्य परिवर्तनम्	3	3.75
15.	समयलेखनम्	2	2.50
16.	अशुद्धिसंशोधनम्	3	3.75
17.	पत्र–लेखनम्	4	5.00
18.	संकेताधारित–संवाद–लंखनम्	4	5.00
19.	अनुवादकार्यम् (हिन्दीतः संस्कृतानुवादम्)	4	5.00
20.	चित्राधारितं वर्णनम्	3	3.75
21.	कथाक्रमस्य संयोजनम्	3	3.75
	योग	**80**	**100**

मॉडल प्रश्न पत्र ब्ल्यू प्रिन्ट

विषय – संस्कृतम् (तृतीय भाषा) कक्षा – दशमी पूर्णांक – 80

क्रं. सं.	उद्देश्य इकाई / उप इकाई	ज्ञान				अवबोध				ज्ञानोपयोगी / अभिव्यक्ति				कौशल / मौलिकता				योग
		अति लघु	लघु. SA1	लघु. SA2	निबं	अति लघु	लघु. SA1	लघु. SA2	निबं	अति लघु	लघु. SA1	लघु. SA2	निबं	अति लघु	लघु. SA1	लघु. SA2	निबं	
1.	पठितगद्यांशस्य हिन्दीभाषया अनुवादः								5(1) *									5(1)
2.	पठितपद्यांशस्य हिन्दीभाषया अनुवादः								5(1) *									5(1)
3.	पठित द्यांशस्य संस्कृत–व्याख्या																4(1)*	4(1)
4.	पठितनाट्यांशस्य संस्कृत–व्याख्या															3(1)*		3(1)
5.	प्रश्नोत्तराणि संस्कृतमाध्यमेन अष्टसु–षट् प्रश्नानाम्											3(1)*						3(1)
6.	प्रश्ननिर्माणम्	1(1)				2(2)				1(1)								4(4)
7.	पाठ्यपुस्तकात् श्लोकद्वयलेखनम्			3(1)														3(1)
8.	अपठितावबोधनम् (एकः सरलः गद्यांशः)				2(1)*				5(–)				2(–)				1(–)	10(1)
9.	सन्धिः		2(1)				2(1)											4(2)
10.	समासः			3(1)														3(1)
11.	कारकाणि											3(1)						3(1)
12	प्रत्ययाः		2(1)				2(1)											4(2)
13.	अव्ययपदानि											3(1)						3(1)
14.	वाच्य परिवर्तनम्									3(3)								3(3)
15.	समयलेखनम्		2(1)															2(1)
16.	अशुद्धिसंशोधनम्							3(1)										3(1)
17.	पत्र–लेखनम्																4(1)*	4(1)
18.	संकेताधारित–संवाद–लेखनम्												4(1)					4(1)
19.	अनुवादकार्यम् (हिन्दीतः संस्कृतानुवादम्)								4(1)									4(1)
20.	चित्राधारितं वर्णनम्											3(1)*						3(1)
21.	कथाक्रमस्य संयोजनम्											3(1)						3(1)
	योग	1(1)	6(3)	6(2)	2(1)	2(2)	4(2)	3(1)	19(3)	4(4)	–	15(5)	6(1)	–	–	3(1)	9(2)	80(28)
	कुल योग	15(7)				28(8)				25(10)				12(3)				80(28)

विकल्पों की योजना :– 1,2,3,4,5,17,20

नोट :– कोष्ठक में बाहर की संख्या अंको की तथा भीतर प्रश्नों के लिए है।

हस्ताक्षर

आदर्श–प्रश्न–पत्रम्

माध्यमिक परीक्षा, 2018

संस्कृतम् (तृतीय भाषा)

समय : 3:15 घण्टे

पूर्णांक : 80

परीक्षार्थिभ्यः सामान्यनिर्देशाः

1. परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रे निर्धारितस्थाने नामांकः अनिवार्यतो लेखनीयः।
2. सर्वे प्रश्नाः अनिवार्याः।
3. सवेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि।
4. एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि।
5. सर्वेषां प्रश्नानाम् उत्तराणि संस्कृत–माध्यमेन एव लेखनीयानि।

1. अधोलिखितस्य गद्यांशस्य सप्रसंगं हिन्दीभाषया अनुवादं करोतु 5

अनन्तरं सर्वे जालेन बद्धाः बभूवुः। ततो यस्य वचनाम् तत्र अवलम्बितास्तं सर्वे तिरस्कुर्वन्ति। तस्य तिरस्कारं श्रुत्वा चित्रग्रीव उवाच– '' नायमस्य दोषः। विपत्काले विस्मय' एव कापुरुषलक्ष्मणम्। तदत्र धैर्यमवलम्ब्य प्रतीकारश्चिन्त्यनाम्। इदानीमप्येव क्रियाताम्। सर्वैरेकचित्तीभूय जालमादायोड्डीयताम्। इति विचिन्त्य सर्वे पक्षिणः जालमदायोत्पतिताः। अनन्तरं स व्याधः सुदूराज्जालापहारकान् तान् अवलोक्य पश्चाद् धावनम् अकरोत्। ततस्तेषु चक्षु विषयातिक्रान्तेषु पक्षिषु व्याधो निवृत्तः।

अथवा

सत्यं वद। धर्मं चर। स्वाध्यान्मा प्रमदः। सत्यान्न प्रमदिव्यम्। धर्मान्न प्रमदितव्यम्। कुशलान्न प्रमदितव्यम्। भूत्यै न प्रमदितव्यम् । स्वाध्याय–प्रवचनाभ्यां न प्रमदितव्यम्। देवपितृकार्याम्यां न प्रमदितव्यम् । मातृदेवो भव। पितृदेवो भव। आचार्यदेवो भव। अतिथिदेवो भव। यानि अनवद्यानि कर्माणि तानि सेवतिव्यानि नो इतराणि।

2. अधोलिखितस्य पद्यांशस्य सप्रसंगं हिन्दीभाषाया अनुवादं करोतु – 5

गायन्ति देवाः किल गीतकानि
धन्यास्तु ते भारतभूमि भागे।
स्वर्गापवर्गास्पदमार्गभूते
भवन्ति भूयः पुरुषाः सुरत्वात्।।

अथवा

गावः प्रसन्नाः मनुजाः प्रसन्नाः
देवा प्रसन्नाः व्रतदानयज्ञैः।

किं नाम तद्यन्न भरौ समृद्धं

विद्या–समृद्धो भवता विधेयः ।।

3. अधोलिखितस्य पद्यांशस्य सप्रसंगं संस्कृतव्याख्यां करोतु – 4

न भोगभवने रमणीयम्

न च सुखशयने शयनीयम्

अहर्निशं जागरणीयम्

लोकहितं मम करणीयम्।।

अथवा

पृथिव्यां त्रीणी रत्नानि जलमन्नं सुभाषितम्।

मूढैः पाषाण–खण्डेषु रत्नसंज्ञां विधीयते।।

4. अधोलिखितस्य नाट्यांशस्य सप्रसंगं संस्कृत–व्याख्यां करोतु 3

तापसी – सर्वदमन्, शकुन्तलावण्यं प्रेक्षस्व।

बालः – (सदृष्टिक्षेपम्) कुत्र वा मम माता ?

उभे – नामसादृश्येन वंचितो मातृवत्सलः।

द्वितीया – वत्स, अस्य मृत्तिकामयूरस्य रम्यत्वं पश्येति भणितोऽसि।

अथवा

सर्वदारः – (राजोचितं प्रणम्य) विजयतां महाराजः।

प्रतापः – (दीर्घनिःश्वस्य मुखम् उन्नमय्य च) हा धिक् । विजयध्वनिं कृत्वा त्वम् अपि किम् एवं मां लज्जयसे भ्रातः।

सर्वदारः– प्राणाधार । किम् इदं भवान् वदति ? स्वधर्माय भवता सर्वं किमपि कृतम्। स्वाधीनतायै सर्वं किमपि सोढम् ।

भवतः सदा एव विजय एव भविष्याति।

प्रताप :– कीदृशस्तावद् विजयः ? स्वदेशं परित्यंक्तुं तु समुद्यतः अस्मि।

5. अधोलिखितेषु प्रश्नेषु केषांचन षट् प्रश्नानामुत्तराणि संस्कृतमाध्यमेन लिखतु– ½ x 6 =3

(क) का वीणा पुस्तकधारिणी अस्ति ?

(ख) जयन्तः कस्य सुतः अस्तिः ?

(ग) माहाराणाप्रतापस्य राज्याभिषेकः कुत्र अभवत् ?

(घ) केशवानन्दस्य मातुः नाम किम् आसीत् ?

(ङ) ' वन्दे नितरां भारत–वसुधाम्' इत्यस्य पाठस्य रचनाकारः कः अस्ति ?

(छ) भामाशाहः किम् आदाय प्रतापस्य समीपम् आगच्छति ?

(ज) सुजानसिंहः कस्य अपरं नाम आसीत् ?

निदेर्श : प्रश्न संख्या 6–9 पर्यन्तं रेखांकितपदमाधृत्य प्रश्ननिर्माणं करोतु –

6. भारतमाता नानतीर्थैः रमणीया। 1

7. मरुदेशे तित्तिराणां मधुरः विरावः भवति। 1

8. भामाशाहः देशरक्षायै स्वसम्पत्तिं समर्पवति। 1

9. मम लोकहितं करणीयम्। 1

10. प्रश्नपत्रादतिरिच्य स्वपाठ्यपुस्तकात् श्लोकद्वयं लिखतु। 1½ x 2 =3

11. अधोलिखितं गद्यांशं पठित्वा एतदाधारित प्रश्नानाम् उत्तरराणि यथानिर्देशं लिखतु –

वैदिकसाहित्यं प्रमुखतया द्विविधम् अस्ति– मन्त्ररूपः ब्राह्मणरूपश्य। मन्त्रसमुदायः एव संहिताशब्देन व्यवाह्रीयते। ब्राह्मणरूपः वेदभागः संहिता भागस्य व्याख्यारूपः विद्यते। ब्राह्मणभागः यागस्वरूपबोधकः अस्ति। एषः त्रिधा विभक्तः भवति – ब्राह्मणम्, आरण्यकम् उपनिषद् च। यज्ञस्वरूपप्रतिपादकः ब्राह्मणभागः । अरण्ये पठिताः यज्ञस्य आध्यात्मिकरूपं विवेचयन्तः वेदभागः आरण्यकानि। उपनिषदः ब्राह्मत्मबोधिकाः मोक्षसाधिकाः सन्ति। वेदस्य अन्तिमरूपतया उपनिषद् 'वेदान्तः' इत्युच्यते। ब्राह्मणभागः गृहस्थानां कृते उपयोगी, आरण्यकभागः वानप्रस्थानां कृते, उपनिषद् भागश्च संन्यस्तानां हेतो बहूपयोगी भवति।

(क) अस्य गद्यांशस्य समुचितं शीर्षकं लिखतु। 1

(ख) यथानिर्देशं प्रश्नान् उत्तरतु।

1. ब्राह्मणभागः कस्य बोधकः अस्ति ? 1
2. मन्त्रसमुदायस्य अपरं नाम किम् अस्ति ? 1
3. यज्ञस्य आध्यात्मिकं रूपं के विवेचयन्ति ? 1
4. संन्यस्तानां कृते कः बहूपयोगी भवति ? 1
5. ब्राह्मणग्रन्थानां कति भागाः सन्ति ? 1

(ग) यथानिर्देशं प्रश्नान् उत्तरतु –

1. 'ब्राह्मणभागः यागस्वरूपबोधकः अस्ति' अत्र कर्तृपदं लिखतु। 1
2. ' वैदिकसाहित्यं प्रमुखतया द्विविधम्' अत्र विशेष्यपदं किम् ? 1
3. ' एषः त्रिधा विभक्तः भवति' अत्र 'एषः' सर्वनामस्थाने संज्ञापदं लिखतु 1
4. ' आरण्यकानि कुत्र पठितानि भवन्ति ? 1

12. अधोलिखितपदयोः सन्धिविच्छेदं कृत्वा सन्धेः नामापि लिखतु।

1. अन्वयः 1
2. दिगम्बरः 1

13. अधोलिखितपदयोः संन्धिं कृत्वा सन्धेः नामापि लिखतु।

1. पौ +अकः 1
2. नमः + नमः 1

14. अधोलिखितरेखांकित पदेषु समस्तपदानां विग्रहम् अथवा विग्रहपदानां समासं कृत्वा समासस्य नामापि लिखतु।

1. गोविन्दः यथाशक्ति दानं ददाति। 1

2. <u>धनश्यामः</u> नित्यं विद्यालयं गच्छति। 1

3. राजेशः <u>शिवं च केशवं च</u> नमति । 1

15. अधोलिखितरेखांकित पदेषु विभक्तिं तत् कारणं च लिखतु ।

1. <u>राजमार्गम्</u> अभितः वृक्षा सन्ति। 1
2. रामः <u>लक्ष्मणेन</u> सह वनं गच्छति। 1
3. पिता <u>पुत्राय</u> क्रुध्यति। 1

16. कोष्ठकेषु प्रदत्त–प्रकृतिप्रत्ययानुसारं शब्दनिर्माणं कृत्वा रिक्तस्थानानि पूरयित्वा लिखतु।

1. मनसा सततं ....। (स्मृ+अनीयर) 1
2. ग्रामं .... तृणं पश्यति । (गम्+शतृ) 1

17. अधोलिखितवाक्ययोः रेखांकितपदेषु प्रकृतिं प्रत्ययं च पृथककृत्वा लिखतु।

1. वचने का <u>दरिद्रता</u>। 1
2. <u>बालिका</u> पुस्तकं पठति। 1

18. मजूषायां प्रदतैः अव्ययपदैः रिक्तस्थानानि पूरयित्वा लिखतु।

अपि, इव, तत्र, यथा

1. गृहीत .... केशेषु मृत्युना धर्ममाचरत्। 1
2. कथमहं .... गच्छामि। 1
3. जननी जन्मभूमिश्च स्वर्गाद् .... गरीयसी। 1

प्रश्नसंख्या 19–21 पर्यन्तं अधोलिखितवाक्यानां वाच्यपरिवर्तनं कृत्वा लिखतु –

19. अहं ग्रामं गच्छामि। 1

20. सीतया पुस्तकं पठ्यते। 1

21. शीलया हस्यते। 1

22. धाटिका चित्रसहायतया अंकानां स्थाने संस्कृतशब्देषु समयलेखनं करोतु।

(क) मोहनः प्रातःकाले .... वादने विद्यालयं गच्छति। 1

(ख) चालकः .... वादने कारयानं चालयति। 1

23. अधोलिखितं वाक्यत्रयं शुद्धं कृत्वा लिखतु।

1. श्यामः नेत्रात् काणः अस्ति। 1
2. मोहनः भिक्षुकं वस्त्रं ददाति। 1
3. हिमालयेन गंगा निर्गच्छति। 1

24. भवान् राजकीय–आदर्श–उच्च–माध्यमिक–विद्यालय–सोमपुरस्य दशमकक्षायाः विद्यार्थी सुरेशः। भवतः पिता अतीव निर्धनः अस्ति। स्वस्य प्रधानाचार्याय शुल्कमुक्त्यर्थम् एकं प्रार्थनापत्रं लिखतु। 4

अथवा

भवान् गोविन्दः। स्वकीयं मित्रं राजेन्द्रं प्रति स्वविद्यालयस्य वार्षिकोत्सवविषये अधोलिखितपत्रं मंजूषापदसहायतया पूरयित्वा लिखतु।

परिवारे, वार्षिकोत्सवस्य, पत्रोत्तरं, स्वकरकमलेन, कुशलताम्, विविधाः, स्वीकृतवान्, पुरस्कारम्

शैलपुरतः

दिनांकः – 18.03.2018

प्रियमित्रं राजेन्द्र।

नमस्ते।

अत्र अहं कुशलं, भवतः .... कामये। फरवरी मासे पच्चमे दिनांके मम विद्यालये .... आयोजनम् अभवत्। आस्मिन् दिवसे .... प्रतियोगिताः अभवन्। अहमपि धावनप्रतियोगितायां, वादविवादप्रतियोगितायां च भाग ....। पुरस्कारवितरणसमारोहे अस्माकं क्षेत्रस्य विधायकमहोदयः .... पुरस्कारवितरणं कृतवान्। अहमपि .... प्राप्तवान्।

अस्तु .... सर्वेभ्यः यथायोग्यं नमस्काराः, ... शीघ्रमेव प्रेषणीयम्।

भवतः मित्रम्
गोविन्दः

25. मंजूषायाः उपयुक्तपदानि गृहीत्वा पितापुत्रयोः मध्ये योगदिवसविषये संवादं पूरयतु। ½ x 8 = 4

कुर्वन्ति, आगच्छ, जूनमासस्य, कार्यक्रमः, शक्नोमि, अस्माकम्, योगदिवसे, अन्ताराष्ट्रियदिवसः

पुत्र – भोः पितः। .... 29 दिनांके कः दिवसः भवति ?

पिता – अरे। तस्मिन् दिने तु .... भवति।

पुत्रः– योगदिवसे के .... भवन्ति ?

पिता – .... विश्वेजनाः प्रणायामं व्यायामं च कुर्वन्ति।

पुत्र– योगेन .... स्वास्थ्यं सम्यक् भवति वा ?

पिता – आम्। ये योगं .... ते रुग्णाः न भवन्ति।

पुत्र – तर्हि अहम् अपि योगं कर्तुं .... वा ?

पिता – किमर्थं न, ... आवां योगं करवाव।

26. अधोलिखितषड् वाक्येषु केषांचन चतुर्णां वाक्यानां संस्कृतभाषया अनुवादं करोतु। 1+1+1+1 = 4

1. विद्या विनम्रता प्रदान करती है।

2. जननी और जन्मभूमि स्वर्ग से भी महान है।

3. विपत्ति के समय दोषारोपण करना ही कायरपुरुष का लक्षण है।

4. कृष्ण के चारों ओर बालक है।

5. हम सब नाटक देखते है।

6. राजेश महेश का मित्र है।

27. अधः चित्रं दृष्ट्वा मंजूषायां प्रदत्तशब्दानां सहायतया संस्कृते अष्ट वाक्यानि रचयतु। ½x6 =3

वृक्षरोपणम्, वृक्षेभ्यः, प्राप्स्यामः,सत्पुरुषाः, फलानि, खादन्ति

अथवा

अधोलिखितम् अनुच्छेदं मंजूषायाः सहायतया पूरयित्वा लिखतु।

युद्धे, निशाचरान्, मर्यादापुरुषोत्तमः, वाल्मीकिना, श्रीरामकथायाः, अवतारः

1. रामायणं .... लिखितम् अस्ति।

2. आस्मिन् ग्रन्थे .... वर्णनम् अस्ति।

3. श्रीरामस्य .... साधूनां परित्राणाय धर्मसंस्थापनाय च अभवत्।

4. लंकापतिरावणं रामः .... अहनत्।

5. श्रीरामः .... आसीत्।

28. अधोलिखितवाक्यानि क्रमरहितानि सन्ति। यथाक्रमं संयोजनं कृत्वा लिखतु। ½ x 6 =3

1. लतायां बहूनि पक्वानि द्राक्षाफलानि आसन्।

2. एकः बुमुक्षितः शृगालः भेजनार्थं वने इतस्ततः भ्रमति स्म।

3. परं तथापि द्राक्षाफलानि न प्राप्नोत्।

4. एकस्मिन् स्थाने सः द्राक्षालतां पश्यति।

5. 'एतानि द्राक्षाफलानि अग्लानि'' इति उक्त्वा कुपितः शृगालः ततः गतः।

6. तानि खादितुं सः नैकवारं प्रयासम् अकरोत्।

उत्तरतालिका – संस्कृतम्

प्रश्न संख्या	अपेक्षित–उत्तर	खंडवार अंक	पाठ्य पुस्तक की संख्या
1	पाठ्यपुस्तकानुसारं प्रदत्तगद्यांशस्य हिन्दीभाषया सप्रसंगम् अनुवादः स्वीकार्यः (द्वयोः एकस्य)	1+4	4 80
2	पाठ्यपुस्तकानुसारं प्रदत्तपद्यांशस्य हिन्दीभाषया सप्रसंगम् अनुवाद स्वीकार्यः। (द्वयोः एकस्य)	1+4	1 64
3	पाठ्यपुस्तकानुसारं प्रदत्तपद्यांशस्य सप्रसंगं संस्कृतव्याख्या स्वीकार्या (द्वयोः एकस्य)	1+3	35 51
4	पाठ्यपुस्तकानुसारं प्रदत्तनाट्यांशस्य सप्रसंगं संस्कृतव्याख्या स्वीकार्या (द्वयोः एकस्य)	3	80 58
5	केषांचन षट् प्रश्नानाम् उत्तराणि अपेक्षितानि – (क) सरस्वती (ख) शक्रस्य (ग) गोगुन्दाग्रामे (घ) साराँ (ड.) 'श्रीजी महाराजः (च) प्रियदर्शनेन सर्पेण (छ) धनराशिग्रन्थिम् (ज) सूरजमल्लस्य	½x6	 9 23 29 39 47 76 59 79
6	भारतमाता कैः रमणीया ?	1	47
7	मरुदेशे केषां मधुरः विरावः भवति ?	1	64
8	भामाशाहः किमर्थं। कस्मै स्वसम्पत्तिं समर्पयति?	1	59
9	मम किं करणीयम् ?	1	35
10	द्वौ श्लोकौ स्वीकार्यौ यौ अस्मिन् प्रश्नपत्रे न स्याताम्	1½+1½	
11	(क) वैदिकसाहित्यम् (ख) 1. यागस्वरूपबोधकः 2. संहिता 3. आरण्यकानि 4. उपनिषद्भागः 5. त्रिधा (ग) 1. ब्राह्मणभागः 2. वैदिकसाहित्यम् 3. ब्राह्मणभागः 4. अरण्ये	1 1 1 1 1 1 1 1 1 1	
12	1. अनु+अयः (यण् सन्धिः)	½+½	

उत्तरतालिका – संस्कृतम्

	2. दिक्+अम्बरः (जशव सन्धिः)	½+½	
13	1. पावकः (अयादि सन्धिः) 2. नमो नमः (उत्व सन्धिः)	½+½ ½+½	
14	1. शक्तिम् अनतिक्रम्य (अव्ययी भावः) 2. धन इव श्यामः (कर्मधारयः) 3. शिवकेशवौ (द्वन्द्वः)	½+½ ½+½ ½+½	
15	1. द्वितीया (अभितः योगे) 2. तृतीया (सह योगे) 3. चतुर्थी (क्रुध् योगे)	½+½ ½+½ ½+½	
16	1. स्मरणीयम् 2. गच्छन्	1 1	
17	1. दरिद्र+ तल् 2. बालक + टाप्	1 1	
18	1. इव 2. तत्र 3. अपि	1 1 1	
19	मया ग्रामः गम्यते।	1	
20	सीता पुस्तकं पठति	1	
21	शीला हसति।	1	
22	(क) अष्ट (ख) सपादद्विवादनम्	1 1	
23	1. श्यामः नेत्रेण काणः अस्ति। 2. मोहनः भिक्षुकाय वस्त्रं ददाति। 3. हिमालयात् गंगा निर्गच्छति।	1 1 1	
24	निर्देशानुसारं पत्रं स्वीकार्यम् अथवा निम्नक्रमेण पत्रं पूरणीयम् 1. कुशलताम् 2. वार्षिकोत्सवस्य 3. विविधाः 4. स्वीकृतवान् 5. स्वकरकमलेन 6. पुरस्कारम् 7. परिवारे 8. पत्रोत्तरम्	½x8 =4	
25	जूनमासस्य, अन्ताराष्ट्रिययोगदिवसः, कार्यक्रमाः, योगदिवसे, अस्माकम्, कुर्वन्ति, शक्नोमि, आगच्छ	½x8 =4	
26	1. विद्या ददाति विनयम्। 2. जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। 3. विपत्काले विस्मय एव का पुरुषलक्षणम्।		

उत्तरतालिका – संस्कृतम्

	4. कृष्णं परितः बालकाः सन्ति। 5. वयं नाटकं पश्यामः। 6. राजेशः महेशस्य मित्रम् अस्ति।	1x4 =4	
27	चित्रं दृष्ट्वा निर्देशनुसारं मंजूषायां प्रदत्तशब्दानां सहायतया षड् वाक्यानि स्वीकरणीयानि। अथवा 1. बाल्मीकिना 2. श्रीरामकथायाः 3. अवतारः 4. निशाचरान् 5. युद्धे 6. मर्यादापुरुषोत्तमः	½x6 =3	
28	निम्नक्रमेण कथासंयोजनं स्वीकार्यम् – 2. 4. 1. 6. 3. 5.	½x6 =3	